# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

**कक्षा**- शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** - ६ **गुणाः** - ७०

**विषयः** - सर्वदर्शनम् **कोड- CC - 2.3.6 (New)** **समयः** - २ तः ५

**दिनाङ्कः** - १०/१२/२०१८ **सन्दर्भग्रन्थः**- न्यायसिद्धान्तमुक्तावली

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वौ समाधेयौ ।** १०

१. सद्रव्या गुणगुम्फिता......... ॥ प्रपूर्य व्याख्यात ।

२. यथाग्रन्थं द्रव्यत्वजातिसिद्धिः क्रियताम् ।

३. सादृश्यस्य लक्षणं विलिख्य तस्य अतिरिक्तपदार्थखण्डनं कुरुत ।

**प्र-२ एक एव समाधेयः ।** **१०**

१. सामान्यस्य लक्षणं विलिख्य जातिबाधकान् विवृणुत ।

१. नास्तिकमतखण्डनपुरस्सरं समाप्तिं प्रति मङ्गलस्य कारणं प्रतिपादयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वौ समाधेयौ ।** १०

१. अभावस्य अधिकरणात्मकत्वम् आशङ्क्य परिहरत ।

२. **परिमाणस्य स्वसमानजातीयोत्कृष्टत्वनियमात्** इति व्याख्यात ।

३. सदलकृत्यं कारणलक्षणं प्रतिपादयत ।

**प्र-४ एक एव समाधेयः ।** **१०**

१. सोदाहरणं असमवायिकारणस्य लक्षणं प्रतिपादयत ।

२. पञ्चान्यथासिद्धस्यः उदाहरणपुरस्सरं लक्षणं विलिखत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ द्वौ समाधेयौ ।** १०

१. कारणस्य लक्षणं प्रतिपाद्य समवायिकारणस्य स्वरूपं प्रतिपादयत ।

२. विशेषगुणानां साधर्म्यं वैधर्म्यं च प्रतिपादयत ।

३. गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धिः क्रियताम् ।

**प्र-६ एक एव समाधेयः ।** **१०**

१. **यद् द्रव्यं यद् द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम्** इति व्याख्यात ।

२. सभेदपुरस्सरं पृथिव्याः लक्षणं विलिखत।

**प्र-७ दश समाधेयाः।** **१०**

१. अन्यथासिद्धि......... ॥ इति कारिकां पूरयत।

२. जातेर्लक्षणं लिखत।

३. किन्नाम अन्योन्याभावत्वम् ?

४. कति अभावाः के च ते ?

५. न्यायनये कति पदार्थाः ?

६. अथ गुणाः.......... च ॥ इति कारिकां पूरयत।

७. कः नित्यसम्बन्धः ?

८. सामान्यपरिहीनास्तु.......... ॥ इति कारिकां पूरयत।

९. कालदिशोर्गुणाः के ?

१०. व्यक्ते.......... संग्रहः ॥ इति कारिकां पूरयत।

११. कति रसाः ? के च ते ?

१२. किन्नाम शरीरम् ?

१३. विषयस्य लक्षणं लिखत।

१४. असमवायिकारणस्योदाहरणं लिखत।

१५. कानि नित्यद्रव्याणि ?